Impact Factor : 6.125

ISSN : 2395 - 5104

# शब्दार्णव Shabdarnav

*International Peer Reviewed Refereed Journal of Multidisciplinary Research*

Year 8 | Vol. 16, Part-III | July-December, 2022

**Scientific Research**
**Educational Research**
**Technological Research**
**Literary Research**
**Behavioral Research**

Editor in Chief
DR. RAMKESHWAR TIWARI

Executive Editors
DR. KUMAR MRITUNJAY RAKESH
MR. RAGHWENDRA PANDEY

Published by
SAMNVAY FOUNDATION
Mujaffarpur, Bihar

- वैदिक देवताओं का स्वरूप 324–327
  *सर्वेश ओझा*
- कारकशब्दार्थनिरूपणम् 328–331
  *Sourav Mondal*
- तीर्थानां त्रिविधस्वरूपम् 332–335
  *शिवाकान्त कटेहा*
- काव्यशास्त्रस्य परिचयः 336–337
  *सोनिया सैनी*
- अचिन्त्यभेदाभेदवाद में तर्क की अप्रतिष्ठा एवं शब्द का प्रामाण्य 338–344
  *डॉ0 सन्ध्या राठौर व सुजीत कुमार*
- रामायण में वर्णित नारी 345–348
  *सुनिता कुमारी*
- जयपुर में चन्द्रमहल एवं जलमहल का कलात्मक विश्लेषण 349–353
  *तोसिफ अली व डॉ0 शिवकुमार मिश्रा*
- ड. यतीन्द्रविमलचतुर्धुरीणविरचितभारतहृदयारविन्दे नारीणामवदानम् 354–359
  *टोटन–भौमिकः*
- चित्तप्रसादन के व्यावहारिक उपाय 360–363
  *वसुंधरा*
- भासविरचितं पञ्चरात्रं नाटकस्य वैशिष्ट्यानि 364–365
  *Vijaya Kumari*
- कुमारसम्भवम् में प्रयुक्त धातुओं का अर्थगत वैशिष्ट्य 366–367
  *विश्वबन्धु उपाध्याय*
- विविधवैयाकरणानां दिशा सम्प्रदानविचारः 368–370
  *Bithika Kundu*
- यास्कदृष्ट्या–देवतापदार्थनिरूपणम् 371–372
  *विवेक चन्द्र झा*
- आतंकवाद के निवारण में श्रीमद्भगवदगीता का योगदान 373–374
  *डॉ0 सपना राठौर*
- **Journey of Lokpal and Lokayuktas in India** 375-377
  *Ajoy Gupta*
- **The Effects of Deceptive Advertising on Children** 378-381
  *Anjali Kushwaha*
- **Relevance of the Ideals of Sri Ramachandra at Present** 382-384
  *Archita Pathak*
- **Factors behind the Deplorable Health Condition of Women in India** 385-389
  *Dr. Garima Yadav & Dr. Pragya Pandey*
- **Ethical Leadership: A Discussion from Aristotelian Cardinal Virtue Perspective** 390-394
  *Dr. Jyoti Kumari*
- **Joothan:-A Revolutionary Transformation of Society and Human Consciousness** 395-398
  *Dr. Jyotsna kumari*
- **Henry James's The Turn of the Screw and Its Cinematic Adaptation** 399-401
  *Dr. Manisha*

# कारकशब्दार्थनिरूपणम्

**Sourav Mondal***

व्याकरणं हि वेदपुरुषस्य मुखेन तुलितम्। तदुक्तं- 'मुखं व्याकरणं स्मृतम्' इति। मुखेनाहारग्रहणं विना क्षीणशरीरत्वान्मनुष्याणां कर्मक्षमतापगच्छति। एवमेव व्याकरणं विना वेदार्थावबोधो नैव सम्भवति। तथा यज्ञानुष्ठानादिकमपि न सिध्यति। तेन वेदस्य व्यर्थतैव प्रतिपद्यते। किन्तु व्याकरणेन वेदार्थावबोधे यज्ञानुष्ठानादिकमपि भवति। अतः षडङ्गेषु व्याकरणस्यैव प्राधान्यं दरीदृश्यते। अत एव भाष्यकृता पतञ्जलिनोक्तं- 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति। प्रधानञ्च षट्ष्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति'[1] इति।

**'समुद्रवद् व्याकरणं माहेश्वरे तदर्द्धकुम्भोद्धरणं बृहस्पतौ।**
**तद्भागाच्च शतं पुरन्दरे कुशाग्रविन्दूत्पतितं हि पाणिनौ।।'**

इत्यतो ज्ञायते यत् महेश्वरादेव व्याकरणस्योत्पत्तिरिति। तस्माच्च निखिलविद्याधिकारिणो महेश्वरादेव व्याकरणशिक्षां कृतवान् पाणिनिः। शङ्करश्च श्रुतिस्मृतिपुराणानां कल्याणकारिणीं द्योतनशीलां वर्णसमाम्नायरूपां वाणीं धीमते दाक्षीपुत्राय प्रादात्। तदुच्यते

**'शङ्करः शाङ्करीं प्रादाद् दाक्षीपुत्राय धीमते।**
**वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः।।'** इति।

प्रकृतिप्रत्ययविषयकमालोचनं यत्र स्फुटं भासते तदेव व्याकरणम्। अस्मिन् व्याकरणे आलोचितेषु विविधेषु विषयेष्वन्यतमं तावत्कारकम्। क्रियानिमित्तत्वं कारकमिति क्रियान्वयित्वं कारकं चेत्यादीनि तावत् कारकविषयकानि वैयाकरणमतानि।

**क्रियानिमित्तत्वं कारकत्वम्** - काशिकायामुच्यते 'कारकशब्दश्च निमित्तपर्यायः। कारकं हेतुरित्यनर्थान्तरम्। कस्य हेतुः? क्रियायाः'। इति। पदमञ्जर्यां हरदत्तेन काशिकोक्तवचनमिदं विशदं व्याख्यातम्। तेन कारकशब्दस्य द्विविधोऽर्थः स्वीकृतः- एकः करोतीति कारकमिति ण्वुलन्तो व्युत्पन्नः, अपरश्चाव्युत्पन्नो निमित्तपर्यायश्चेति। यद्यपि काशिकाकृता 'कारकं हेतुरित्यर्थान्तरमि'त्युक्तं तथापि द्रव्यगुणविषयस्य हेतोः कारकत्वानुपपत्त्या क्रियाहेतुत्वं क्रियानिमित्तत्वं वा कारकत्वमित्युपदर्शितं हरदत्तपादेन- अनाश्रितव्यापारं निमित्तं हेतुः, आश्रितव्यापारं कारकम्, उक्तञ्च-

**"द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्।**
**अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते।।"** इति।

कारकार्थनिरूपणावसरे सारमञ्जर्य्यामुक्तम्- तत्र क्रियानिमित्तत्वं कारकत्वमिति वैयाकरणाः। तन्न, मैत्रस्य तण्डुलं पचतीत्यादौ सम्बन्धिनि मैत्रे कारकत्वापत्तिः, सम्प्रदानादेरनुमतिप्रकाशनद्वारैव तण्डुलसम्पादनद्वारापि पाकनिमित्तत्वात्। विभक्त्यर्थद्वारा क्रियान्वयित्वं कारकत्वमिति नैयायिकाः। अत एव नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयस्य अव्युत्पन्नत्वात् तद्द्वारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वं कल्प्यम्। विभक्तिस्तु क्वचित्सुबात्मिका क्वचित्तिङात्मिका चेति शेषः। स्तोकं पचतीत्यादौ क्रियाविशेषणेऽतिप्रसक्तिप्रसङ्गवारणाय विभक्त्यर्थद्वारेति। तत्र हि द्वितीया साधुत्वार्था। सम्बन्धिनः क्रियानिमित्तत्वेऽपि न क्रियान्वयित्वम्, अतो नातिव्याप्तिः। गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक्स्वभेषजैः' इत्यादौ तु नामाध्याहारः कर्तव्योऽतो नातिव्याप्तिः इति।

**क्रियान्वयित्वं कारकत्वम्** – भट्टोजिदीक्षितेन 'करोतीति कारकम्' इत्यन्वर्थसंज्ञया यद्वा करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्त्या कारकशब्दस्य क्रियापदत्वं स्वीकृत्य क्रियान्वयित्वं कारकत्वमिति स्वीकृतम्। अत्र प्रमाणं – 'यावद्ब्रूयात्क्रियायामिति तावत्कारक इति' 'कारके' इति सूत्रस्थं भाष्यम्। 'कारकाद्दत्तश्रुतयोरेवाशिषि' इति सूत्रे कारकशब्दे स्वरितत्वप्रतिज्ञाबलात्कर्त्रादिषट्कस्यैव ग्रहणम्। तेन नटश्रुतमित्यादौ न दोषः।

परन्तु पक्षेऽस्मिन् शीघ्रं धावतीति वाक्ये क्रियाविशेषणस्य क्रियायां साक्षादन्वयात्कारकत्वं स्वीकार्यं यदेवानिष्टम्। भवानन्दसिद्धान्तवागीशः कारकचक्रे कारकलक्षणमालोचयन् एवमाह तत्र क्रियानिमित्तत्वं कारकत्वमिति न सामान्यलक्षणम्। सम्प्रदानादेरनुमतिप्रकाशनद्वारैव तण्डुलादिसम्पादनद्वारा सम्बन्धिनोऽपि पाकादिक्रियानिमित्तत्वेन

1

*Assistant Professor, Dept. of Sanskrit, Vivekananda College, Kolkata-63, West Bengal

Impact Factor : 6.240

ISSN 2349-364X

# वेदाञ्जलि Vedanjali

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष-९ अंक-१८, भाग-३ जुलाई-दिसम्बर, २०२२

प्रधान सम्पादक

डॉ० रामकेश्वर तिवारी

सह सम्पादक

श्री प्रसून मिश्र



प्रकाशन : वैदिक एजूकेशनल रिसर्च सोसाइटी, वाराणसी

♦ भारतीय दर्शन में निरीश्वरवाद की अवधारणा :
चर्वाक, जैन तथा बौद्ध दर्शन के सन्दर्भ में 279–282
*मृदुल कृष्ण मिश्र*

♦ जैनेंद्र के उपन्यासों में स्त्री चरित्र : एक विश्लेषण 283–287
*मुकेश रंजन*

♦ कविरमेधाव्रताचार्यविरचितदयानन्ददिग्विजयमाध्वाचार्यविरचितशङ्कर–
दिग्विजयमहाकाव्ययोः छन्दसां प्रयोगस्य तुलनात्मकम्–समीक्षा 288–290
*नरेन्द्रसिंहः*

♦ वैष्णवमहापुराणों में वर्णित गंगा 291–294
*नयन कुमार तिवारी*

♦ पारस्करगृह्यसूत्रे लोकव्यवहारः 295–297
*परिणीता शर्मा बरुआ*

♦ पद्मपुराण में वर्णित सृष्टिक्रम 298–300
*प्राची प्रभा*

♦ महाकवि भारवि का जीवनवृत्त 301–305
*डॉ0 राकेश कुमार व प्रमिला यादव*

♦ भारतरत्न–पण्डित–मदनमोहन–मालवीय–महोदयस्य
व्यक्तित्वं कृतित्वं च 306–310
*प्रवीण देवरानी*

♦ साहित्य में छन्दों की उपादेयता 311–314
*प्रियंका*

♦ पंचगव्य की वैदिक महत्ता एवं उसका वैज्ञानिक विश्लेषण 315–317
*राजकुमार झा*

♦ ज्ञान–मीमांसा उपनिषदों के परिप्रेक्ष्य में 318–320
*राकेश कुमार व प्रो0 टी0आर0 निरंजन*

♦ माण्डूक्योपनिषद्भाष्यस्थः आत्मनिरूपणे प्रक्रियाभेदः 321–323
*रामेश्वरी शर्मा*

♦ छोटानागपुर के आर्थिक विकास में ईसाई मिशनरियों का योगदान 324–325
*Sameem Ansari*

♦ श्रीकालीपदतर्काचार्यमहोदयस्यानुवादसाहित्यम् 326–328
*सम्प्रीति घोषः*

♦ ब्राह्मण ग्रन्थों में शब्द निर्वचन 329–333
*सर्वेश ओझा*

♦ शाब्दबोधमीमांसा 334–338
*Sourav Mondal*

♦ वैदिक वाङ्मय में मनोविज्ञान 339–341
*शीतलबेन भूपेन्द्रभाई टेलर*

वेदाञ्जलि, *An International Peer Reviewed Refereed Research Journal*
**वर्ष-९, अंक-१८, भाग-३, जुलाई-दिसम्बर, २०२२ | ISSN : 2349-364X | Impact Factor : 6.240**

# शाब्दबोधमीमांसा

Sourav Mondal*

शाब्दबोधो नाम शब्दजन्यो बोधः। शाब्दबोधस्य मीमांसा शाब्दबोधमीमांसेति षष्ठीतत्पुरुषसमासः। दर्शनभेदेन शाब्दबोधप्रक्रिया भिद्यते। किन्तु कस्माच्चिदपि शब्दात् कस्याप्यर्थस्य बोधस्तावन्न भवति यावत्तदर्थस्योपस्थितिस्तस्माच्छब्दान्न जायते। एवं तस्माच्छब्दात्तदर्थस्योपस्थितिरपि तावन्न जायते यावत्तदर्थनिरूपिता शक्तिस्तस्मिन् शब्दे गृहीता न भवेत्। शक्त्याश्रयत्वादेव पदं शक्तमित्युच्यते। ननु का नाम शक्तिरिति चेदुच्यते 'अस्माच्छब्दादयमर्थो बोद्धव्य' इतीश्वरेच्छा शक्तिरिति। सा च शक्तिः कस्मिंश्चिच्छब्दे किमर्थनिरूपितेति चेदुच्यते-

**शक्तिग्रहो व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य सान्निध्यतः सिद्धपदस्य वृद्धाः।**।इति।

एवं पूर्वं शक्तिग्रहस्ततः पदार्थोपस्थितिस्ततश्च शाब्दबोध इत्यस्ति शक्तिग्रहपदार्थोपस्थितिशाब्दबोधानां पौर्वापर्यक्रमः। तत्र यत्प्रकारकयद्विशेष्यकशक्तिग्रहो जायते, शाव्दबोधोऽपि तत्प्रकारकतद्विशेष्यक एव भवति। यथा घटपदे घटत्वप्रकारकघटविशेष्यकार्थनिरूपिता शक्तिः गृहीता वर्तते इति गृहीततादृशशक्तिकस्य श्रोतुः घटत्वप्रकारको घटविशेष्यकः अयं घटः इत्याकारकः शाब्दबोधो जायते। न्यायसिद्धान्तमुक्तावल्ल्यां शाब्दबोधप्रकारविषये उच्यते-

**पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।**।इति।

शाब्दबोधं प्रति पदज्ञानं भवति करणं, वृत्तिज्ञानद्वारा पदजन्यपदार्थोपस्थितिः व्यापारः, शाब्दबोधश्च तत्र फलम्। एकपदजन्योपस्थितेन पदार्थेन सह पदान्तरेणोपस्थितस्य पदार्थस्य अन्वयबोधपूर्वकं यद्विशिष्टार्थकज्ञानम् उत्पद्यते तज्ज्ञानमेव शाब्दबोधो वाक्यार्थबोधो वा। विशिष्टवैशिष्ट्यावगाहिबोध एव शाब्दबोधः, यतो हि विशिष्टवैशिष्ट्यावगाहिबोधेऽस्मिन् एकः पदार्थो विशेष्यरूपेण अपरपदार्था विशेषणरूपेण शाब्दबोधे विषया भवन्ति।

वाक्यस्थपदानां ज्ञानादेव वाक्यार्थज्ञानं वाक्यर्थबोधो वेति न भवति। किन्तु पृथक्पृथक्तया पदार्थप्रतीतेरनन्तरं प्रतीतपदार्थानां परस्परसंसर्गप्रतीतिरन्वयप्रतीतिर्वा वाक्यार्थप्रतीतिः। इयं वाक्यार्थप्रतीतिरेव अन्वयबोधः, शाब्दबोधः, संसर्गबोधो वाक्यार्थबोधो वा। यथा 'घटमानय' इति वाक्यान्तर्गतघटपदस्यार्थः घटः, अम्पदस्यार्थः कर्मत्वम्, आपूर्वकान्नीधातोरर्थः आनयनम्, आख्यातार्थश्च कृतिः, इत्येते पदार्था वाक्यार्थबोधे विषया भवन्ति अपि च पदार्थानां पारस्परिकसम्बन्धोऽपि वाक्यार्थबोधे विषयो भवति। यथा घटपदोत्तरम् अम्बिभक्तिः कर्मत्ववाचकं, कर्मत्वञ्च धात्वर्थतावच्छेदकफलशालित्वम्। आनयनञ्च सन्निहितदेशवृत्तिसंयोगानुकूलव्यापारः। कृतिश्च प्रयत्नः। तेन घटपदार्थेन अम्पदार्थस्य निष्ठत्वसम्बन्धः, अम्पदार्थेन सह धात्वर्थतावच्छेदकसन्निहितदेशसंयोगस्य निरूपकत्वसम्बन्धः, धात्वर्थतावच्छेदकसन्निहितदेशसंयोगेन धात्वर्थव्यापारस्य अनुकूलत्वसम्बम्धः, धात्वर्थव्यापारेण आख्यातार्थकृतेः अनुकूलत्वसम्बन्धः, आख्यातार्थकृत्या च कृतिमतः त्वम् इति ऊह्यपदार्थस्य आश्रयत्वसम्बम्धश्च शाब्दबोधे विषया भवन्ति। तेन घटनिष्ठकर्मतानिरूपकानयनानुकूलकृतिमान् त्वम् इति शाब्दबोधः।

1

*Assistant Professor, Dept. of Sanskrit, Vivekananda College, Kolkata - 63, West Bengal